# Shri Matangi Sahasranamastotram

# શ્રીમાતઙ્ગીસહસ્રનામસ્તોત્રમ્

## Document Information

Text title : mAtaNgIsahasranAmastotra

File name : mAtangIsahasranAmastotra.itx

Category : sahasranAma, devii, dashamahAvidyA, stotra, devI

Location : doc_devii

Transliterated by : Muktabodha.org

Proofread by : Muktabodha.org, DPD

Description-comments : From Shaktapramoda kAlyAdidashamahAvidyAtantrAtmakaH

Acknowledge-Permission: Marjorie Woollacott, Ph.D., Digital Library Coordinator muktabodha.org

Latest update : August 28, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 28, 2021

*sanskritdocuments.org*

# શ્રીમાતઙ્ગીસહસ્રનામસ્તોત્રમ્

અથ માતઙ્ગીસહસ્રનામસ્તોત્રમ્

ઈશ્વર ઉવાચ

શ‍ૃણુ દેવિ પ્રવક્ષ્યામિ સામ્પ્રતન્તત્ત્વતઃ પરમ્ ।
નામ્નાં સહસ્રમ્પરમં સુમુખ્યાઃ સિદ્ધયે હિતમ્ ॥

સહસ્રનામપાઠી યઃ સર્વત્ર વિજયી ભવેત્ ।
પરાભવો ન તસ્યાસ્તિ સભાયાવ્વા મહારણે ॥

યથા તુષ્ટા ભવેદ્દેવી સુમુખી ચાસ્ય પાઠતઃ ।
તથા ભવતિ દેવેશિ સાધકઃ શિવ એવ સઃ ॥

અશ્વમેધસહસ્રાણિ વાજપેયસ્ય કોટયઃ ।
સકૃત્પાઠેન જાયન્તે પ્રસન્ના સુમુખી ભવેત્ ॥

મતઙ્ગોઽસ્ય ઋષિશ્છન્દોઽનુષ્ટુબ્દેવી સમીરિતા ।
સુમુખી વિનિયોગઃ સ્યાત્સર્વસમ્પત્તિહેતવે ॥

એવન્ધ્યાત્વા પઠેદેતદ્યદીચ્છેત્સિદ્ધિમાત્મનઃ ।

દેવીં ષોડશવાર્ષિકીં શવગતામ્માધ્વીરસાઘૂર્ણિતાં
શ્યામાઙ્ગીમરુણામ્બરામ્પૃથુકુચાઙ્ગુઞ્જાવલીશોભિતામ્ ।

હસ્તાભ્યાન્દધતીઙ્કપાલમમલન્તીક્ષ્ણાન્તથા
કર્ત્રિકાન્ધ્યાયેન્માનસપઙ્કજે ભગવતીમુચ્છિષ્ટચાણ્ડાલિનીમ્ ॥

ૐ સુમુખી શેમુષીસેવ્યા સુરસા શશિશેખરા ।
સમાનાસ્યા સાધની ચ સમસ્તસુરસન્મુખી ॥

સર્વસમ્પત્તિજનની સમ્મદા સિન્ધુસેવિની ।
શમ્ભુસીમન્તિની સૌમ્યા સમારાધ્યા સુધારસા ॥

સારઙ્ગા સવલી વેલાલાવણ્યવનમાલિની ।
વનજાક્ષી વનચરી વની વનવિનોદિની ॥

વેગિની વેગદા વેગા બગલસ્થા બલાધિકા ।
કાલી કાલપ્રિયા કેલી કમલા કાલકામિની ॥

કમલા કમલસ્થા ચ કમલસ્થાકલાવતી ।
કુલીના કુટિલા કાન્તા કોકિલા કલભાષિણી ॥

કીરાકેલિકરા કાલી કપાલિન્યપિ કાલિકા ।
કેશિની ચ કુશાવર્ત્તા કૌશામ્ભી કેશવપ્રિયા ॥

કાલી કાશી મહાકાલસઙ્કાશા કેશદાયિની ।
કુણ્ડલા ચ કુલસ્થા ચ કુણ્ડલાઙ્ગદમણ્ડિતા ॥

કુણ્ડપદ્મા કુમુદિની કુમુદપ્રીતિવર્દ્ધિની ।
કુણ્ડપ્રિયા કુણ્ડરુચિઃ કુરઙ્ગનયના કુલા ॥

કુન્દબિમ્બાલિનદની કુસુમ્ભકુસુમાકરા ।
કાઞ્ચી કનકશોભાઢ્યા ક્વણત્કિઙ્કિણિકાકટિઃ ॥

કઠોરકરણા કાષ્ઠા કૌમુદી કણ્ડવત્યપિ ।
કપર્દ્દિની કપટિની કઠિની કલકણ્ઠિની ॥

કીરહસ્તા કુમારી ચ કુરૂઢકુસુમપ્રિયા ।
કુઞ્જરસ્થા કુજરતા કુમ્ભી કુમ્ભસ્તની કલા ॥

કુમ્ભીકાઙ્ગા કરભોરૂઃ કદલી કુશશાયિની ।
કુપિતા કોટરસ્થા ચ કઙ્કાલી કન્દલાલયા ॥

કપાલવાસિની કેશી કમ્પમાનશિરોરુહા ।
કદમ્બરી કદમ્બસ્થા કુઙ્કુમપ્રેમધારિણી ॥

કુટુમ્બિની કૃપાયુક્તા ક્રતુઃ ક્રતુકરપ્રિયા ।
કાત્યાયની કૃત્તિકા ચ કાર્ત્તિકી કુશવર્ત્તિની ॥

કામપત્ની કામદાત્રી કામેશી કામવન્દિતા ।
કામરૂપા કામરતિઃ કામાખ્યા જ્ઞાનમોહિની ॥

ખડ્ગિની ખેચરી ખઞ્જા ખઞ્જરીટેક્ષણા ખગા ।
ખરગા ખરનાદા ચ ખરસ્થા ખેલનપ્રિયા ॥

ખરાંશુઃ ખેલની ખટ્વાખરાખટ્વાઙ્ગધારિણી ।
ખરખણ્ડિન્યપિ ખ્યાતિઃ ખણ્ડિતા ખણ્ડનપ્રિયા ॥

ખણ્ડપ્રિયા ખણ્ડખાદ્યા ખણ્ઢસિન્ધુશ્ચ ખણ્ડિની ।
ગઙ્ગા ગોદાવરી ગૌરી ગોતમ્યપિ ચ ગૌતમી ॥

ગઙ્ગા ગયા ગગનગા ગારુડી ગરુડધ્વજા ।
ગીતા ગીતપ્રિયા ગેયા ગુણપ્રીતિર્ગુરુર્ગિરી ।

ગૌર્ગૌરી ગણ્ડસદના ગોકુલા ગોઃપ્રતારિણી ।
ગોપ્તા ગોવિન્દિની ગૂઢા ગૂઢવિગ્રસ્તગુઞ્જિની ॥

ગજગા ગોપિની ગોપી ગોક્ષાજયપ્રિયા ગણા ।
ગિરિભૂપાલદુહિતા ગોગા ગોકુલવાસિની ॥

ઘનસ્તની ઘનરુચિર્ઘનોરુર્ઘનનિસ્સ્વના ।
ઘુઙ્કારિણી ઘુક્ષકરી ઘૂઘૂકપરિવારિતા ॥

ઘણ્ટાનાદપ્રિયા ઘણ્ટા ઘોટા ઘોટકવાહિની ।
ઘોરરૂપા ચ ઘોરા ચ ઘૃતપ્રીતિર્ઘૃતાઞ્જની ॥

ઘૃતાચી ઘૃતવૃષ્ટિશ્ચ ઘણ્ટા ઘટઘટાવૃતા ।
ઘટસ્થા ઘટના ઘાતકરી ઘાતનિવારિણી ॥

ચઞ્ચરીકી ચકોરી ચ ચ ચામુણ્ડા ચીરધારિણી ।
ચાતુરી ચપલા ચઞ્ચુશ્ચિતા ચિન્તામણિસ્થિતા ॥

ચાતુર્વર્ણ્યમયી ચઞ્ચુશ્ચોરાચાર્યા ચમત્કૃતિઃ ।
ચક્રવર્તિવધૂશ્ચિત્રા ચક્રાઙ્ગી ચક્રમોદિની ॥

ચેતશ્ચરી ચિત્તવૃત્તિશ્ચેતના ચેતનપ્રિયા ।
ચાપિની ચમ્પકપ્રીતિશ્ચણ્ડા ચણ્ડાલવાસિની ॥

ચિરઞ્જીવિની તચ્ચિન્તા ચિઞ્ચામૂલનિવાસિની ।
છૂરિકા છત્રમધ્યસ્થા છિન્દા છિન્દકરી છિદા ॥

છુચ્છુન્દરી છલપ્રીતિશ્છુચ્છુન્દરનિભસ્વના ।
છલિની છત્રદા છિન્ના છિણ્ટિચ્છેદકરી છટા ॥

છદ્મિની છાન્દસી છાયા છરૂ છન્દાકરીત્યપિ ।

જયદા જયદા જાતી જાયિની જામલા જતુઃ ॥

જમ્બૂપ્રિયા જીવનસ્થા જઙ્ગમા જઙ્ગમપ્રિયા ।
જવાપુષ્પપ્રિયા જપ્યા જગજ્જીવા જગજ્જનિઃ ॥

જગજ્જન્તુપ્રધાના ચ જગજ્જીવપરાજવા ।
જાતિપ્રિયા જીવનસ્થા જીમૂતસદૃશીરુચિઃ ॥

જન્યા જનહિતા જાયા જન્મભૂર્જમ્ભસી જભૂઃ ।
જયદા જગદાવાસા જાયિની જ્વરકૃચ્છ્રજિત્ ॥

જપા ચ જપતી જપ્યા જપાહા જાયિની જના ।
જાલન્ધરમયીજાનુર્જાલૌકા જાપ્યભૂષણા ॥

જગજ્જીવમયીજીવા જરત્કારુર્જનપ્રિયા ।
જગતી જનનિરતા જગચ્છોભાકરી જવા ॥

જગતીત્રાણકૃજ્જઙ્ઘા જાતીફલવિનોદિની ।
જાતીપુષ્પપ્રિયા જ્વાલા જાતિહા જાતિરૂપિણી ॥

જીમૂતવાહનરુચિર્જીમૂતા જીર્ણવસ્ત્રકૃત્ ।
જીર્ણવસ્ત્રધરા જીર્ણા જ્વલતી જાલનાશિની ॥

જગત્ક્ષોભકરી જાતિર્જગત્ક્ષોભવિનાશિની ।
જનાપવાદા જીવા ચ જનનીગૃહવાસિની ॥

જનાનુરાગા જાનુસ્થા જલવાસા જલાર્ત્તિકૃત્ ।
જલજા જલવેલા ચ જલચક્રનિવાસિની ॥

જલમુક્તા જલારોહા જલજા જલજેક્ષણા ।
જલપ્રિયા જલૌકા ચ જલાંશોભવતી તથા ॥

જલવિસ્ફૂર્જ્જિતવપુર્જ્જ્વલત્પાવકશોભિની ।
ઝિઞ્ઝા ઝિલ્લમયી ઝિઞ્ઝાઝણત્કારકરી જયા ॥

ઝઞ્ઝી ઝમ્પકરી ઝમ્પા ઝમ્પત્રાસનિવારિણી ।
ટઙ્કારસ્થા ટઙ્કકરી ટઙ્કારકરણાંહસા ॥

ટઙ્કારોટ્ટકૃતષ્ઠીવા ડિણ્ડીરવસનાવૃતા ।
ડાકિની ડામિરી ચૈવ ડિણ્ડિમધ્વનિનાદિની ॥

ડકારનિસ્સ્વનરુચિસ્તપિની તાપિની તથા ।
તરુણી તુન્દિલા તુન્દા તામસી ચ તમઃ પ્રિયા ॥

તામ્રા તામ્રવતી તન્તુસ્તુન્દિલા તુલસમ્ભવા ।
તુલાકોટિસુવેગા ચ તુલ્યકામા તુલાશ્રયા ॥

તુદિની તુનિની તુમ્બા તુલ્યકાલા તુલાશ્રયા ।
તુમુલા તુલજા તુલ્યા તુલાદાનકરી તથા ॥

તુલ્યવેગા તુલ્યગતિસ્તુલાકોટિનિનાદિની ।
તામ્રોષ્ઠા તામ્રપર્ણી ચ તમઃસઙ્ક્ષોભકારિણી ॥

ત્વરિતા જ્વરહા તીરા તારકેશી તમાલિની ।
તમોદાનવતી તામતાલસ્થાનવતી તમી ।

તામસી ચ તમિસ્રા ચ તીવ્રા તીવ્રપરાક્રમા ।
તટસ્થા તિલતૈલાક્તા તરુણી તપનદ્યુતિઃ ॥

તિલોત્તમા ચ તિલકૃત્તારકાધીશશેખરા ।
તિલપુષ્પપ્રિયા તારા તારકેશી કુટુમ્બિની ॥

સ્થાણુપત્ની સ્થિરકરી સ્થૂલસમ્પદ્વિવર્દ્ધિની ।
સ્થિતિઃ સ્થૈર્યસ્થવિષ્ઠા ચ સ્થપતિઃ સ્થૂલવિગ્રહા ॥

સ્થૂલસ્થલવતી સ્થાલી સ્થલસઙ્ગવિવર્દ્ધિની ।
દણ્ડિની દન્તિની દામા દરિદ્રા દીનવત્સલા ॥

દેવા દેવવધૂર્દ્દિત્યા દામિની દેવભૂષણા ।
દયા દમવતી દીનવત્સલા દાડિમસ્તની ॥

દેવમૂર્ત્તિકરા દૈત્યાદારિણી દેવતાનતા ।
દોલાક્રીડા દયાલુશ્ચ દમ્પતી દેવતામયી ॥

દશાદીપસ્થિતા દોષાદોષહા દોષકારિણી ।
દુર્ગા દુર્ગાર્તિશમની દુર્ગમ્યા દુર્ગવાસિની ।

દુર્ગન્ધનાશિની દુસ્સ્થા દુઃખપ્રશમકારિણી ।
દુર્ગ્ગન્ધા દુન્દુભીધ્વાન્તા દૂરસ્થા દૂરવાસિની ॥

દરદામરદાત્રી ચ દુર્વ્યાધિદયિતા દમી ।
ધુરન્ધરા ધુરીણા ચ ધૌરેયી ધનદાયિની ॥

ધીરારવા ધરિત્રી ચ ધર્મદા ધીરમાનસા ।
ધનુર્દ્ધરા ચ ધમની ધમનીધૂર્ત્તવિગ્રહા ॥

ધૂમ્રવર્ણા ધૂમ્રપાના ધૂમલા ધૂમમોદિની ।
નન્દિની નન્દિનીનન્દા નન્દિનીઇનન્દબાલિકા ॥

નવીના નર્મદા નર્મનેમિર્નિયમનિસ્સ્વના ।
નિર્મલા નિગમાધારા નિમ્નગા નગ્નકામિની ॥

નીલા નિરત્ના નિર્વાણા નિર્લ્લોભા નિર્ગુણા નતિઃ ।
નીલગ્રીવા નિરીહા ચ નિરઞ્જનજમાનવા ॥

નિર્ગુણ્ડિકા ચ નિર્ગુણ્ડા નિર્નાસા નાસિકાભિધા ।
પતાકિની પતાકા ચ પત્રપ્રીતિઃ પયસ્વિની ॥

પીના પીનસ્તની પત્ની પવનાશી નિશામયી ।
પરાપરપરાકાલી પારકૃત્યભુજપ્રિયા ॥

પવનસ્થા ચ પવના પવનપ્રીતિવર્દ્ધિની ।
પશુવૃદ્ધિકરી પુષ્પી પોષકા પુષ્ટિવર્દ્ધિની ॥

પુષ્પિણી પુસ્તકકરા પૂર્ણિમાતલવાસિની ।
પેશી પાશકરી પાશા પાંશુહા પાંશુલા પશુઃ ॥

પટુઃ પરાશા પરશુધારિણી પાશિની તથા ।
પાપઘ્ની પતિપત્ની ચ પતિતા પતિતાપતી ॥

પિશાચી ચ પિશાચઘ્ની પિશિતાશનતોષિણી ।
પાનદા પાનપાત્રી ચ પાનદાનકરોદ્યતા ॥

પેયાપ્રસિદ્ધા પીયૂષા પૂર્ણા પૂર્ણમનોરથા ।
પતઙ્ગાભા પતઙ્ગા ચ પૌનઃપુન્યપિબાપરા ॥

પઙ્કિલા પઙ્કમગ્ના ચ પાનીયા પઞ્જરસ્થિતા ।
પઞ્ચમી પઞ્ચયજ્ઞા ચ પઞ્ચતા પઞ્ચમાપ્રિયા ॥

પિચુમન્દા પુણ્ડરીકા પિકી પિઙ્ગલલોચના ।
પ્રિયઙ્ગુમઞ્જરી પિણ્ડી પણ્ડિતા પાણ્ડુરપ્રભા ॥

પ્રેતાસના પ્રિયાલસ્થા પાણ્ડુઘ્ની પીનસાપહા ।

ફલિની ફલદાત્રી ચ ફલશ્રીઃ ફલભૂષણા ॥

ફૂત્કારકારિણી સ્ફારી ફુલ્લા ફુલ્લામ્બુજાનના ।
સ્ફુલિઙ્ગહા સ્ફીતમતિઃ સ્ફીતકીર્ત્તિકરી તથા ॥

બાલમાયા બલારાતિર્બ્બલિની બલવર્દ્ધિની ।
વેણુવાદ્યા વનચરી વિરઞ્ચિજનયત્યપિ ॥

વિદ્યાપ્રદા મહાવિદ્યા બોધિની બોધદાયિની ।
બુદ્ધમાતા ચ બુદ્ધા ચ વનમાલાવતી વરા ॥

વરદા વારુણી વીણા વીણાવાદનતત્પરા ।
વિનોદિની વિનોદસ્થા વૈષ્ણવી વિષ્ણુવલ્લભા ॥

વૈદ્યા વૈદ્યચિકિત્સા ચ વિવશા વિશ્વવિશ્રુતા ।
વિદ્યૌઘવિહ્વલા વેલા વિત્તદા વિગતજ્વરા ॥

વિરાવા વિવરીકારા બિમ્બોષ્ઠી બિમ્બવત્સલા ।
વિન્ધ્યસ્થા પરવન્દ્યા ચ વીરસ્થાનવરા ચ વિત્ ॥

વેદાન્તવેદ્યા વિજયા વિજયાવિજયપ્રદા ।
વિરોગી વન્દિની વન્ધ્યા વન્દ્યબન્ધનિવારિણી ॥

ભગિની ભગમાલા ચ ભવાની ભવનાશિની ।
ભીમા ભીમાનના ભીમાભઙ્ગુરા ભીમદર્શના ॥

ભિલ્લી ભિલ્લધરા ભીરુર્બ્ભરુણ્ડાભી ભયાવહા ।
ભગસર્પિણ્યપિ ભગા ભગરૂપા ભગાલયા ॥

ભગાસના ભવાભોગા ભેરીઝઙ્કારરઞ્જિતા ।
ભીષણા ભીષણારાવા વભગત્યહિભૂષણા ॥

ભારદ્વાજા ભોગદાત્રી ભૂતિઘ્ની ભૂતિભૂષણા ।
ભૂમિદાભૂમિદાત્રી ચ ભૂપતિર્બ્ભરદાયિની ॥

ભ્રમરી ભ્રામરી ભાલા ભૂપાલકુલસંસ્થિતા ।
માતા મનોહરા માયા માનિની મોહિની મહી ॥

મહાલક્ષ્મીર્મદક્ષીબા મદિરા મદિરાલયા ।
મદોદ્ધતા મતઙ્ગસ્થા માધવી મધુમર્દ્દિની ॥

મોદા મોદકરી મેધા મેધ્યામધ્યાધિપસ્થિતા ।
મદ્યપા માંસલોભસ્થા મોદિની મૈથુનોદ્યતા ॥

મૂર્દ્ધાવતી મહામાયા માયા મહિમમન્દિરા ।
મહામાલા મહાવિદ્યા મહામારી મહેશ્વરી ॥

મહાદેવવધૂમાન્યા મથુરા મેરુમણ્ડિતા ।
મેદસ્વિની મિલિન્દાક્ષી મહિષાસુરમર્દ્દિની ॥

મણ્ડલસ્થા ભગસ્થા ચ મદિરારાગગર્વિતા ।
મોક્ષદા મુણ્ડમાલા ચ માલા માલાવિલાસિની ॥

માતઙ્ગિની ચ માતઙ્ગી માતઙ્ગતનયાપિ ચ ।
મધુસ્રવા મધુરસા બન્ધૂકકુસુમપ્રિયા ॥

યામિની યામિનીનાથભૂષા યાવકરઞ્જિતા ।
યવાઙ્કુરપ્રિયા યામા યવની યવનાર્દિની ॥

યમઘ્ની યમકલ્પા ચ યજમાનસ્વરૂપિણી ।
યજ્ઞા યજ્ઞયજુર્યક્ષી યશોનિઃ કમ્પકાકારિણી ॥

યક્ષિણી યક્ષજનની યશોદાયાસધારિણી ।
યશસ્સૂત્રપ્રદા યામા યજ્ઞકર્મકરીત્યપિ ॥

યશસ્વિની યકારસ્થા ભૂયસ્તમ્ભનિવાસિની ।
રઞ્જિતા રાજપત્ની ચ રમા રેખા રવી રણા ॥

રજોવતી રજશ્ચિત્રા રઞ્જની રજનીપતિઃ ।
રોગિણી રજની રાજ્ઞા રાજ્યદા રાજ્યવર્દ્ધિની ॥

રાજન્વતી રાજનીતિસ્તથા રજતવાસિની ।
રમણીરમણીયા ચ રામા રામાવતી રતિઃ ।

રેતો રતી રતોત્સાહા રોગઘ્ની રોગકારિણી ।
રઙ્ગા રઙ્ગવતી રાગા રાગા રાગજ્ઞા રાગકૃદ્દયા ॥

રામિકા રજકી રેવા રજની રઙ્ગલોચના ।
રક્તચર્મધરા રઙ્ગી રઙ્ગસ્થા રઙ્ગવાહિની ॥

રમા રમ્ભાફલપ્રીતી રમ્ભોરૂ રાઘવપ્રિયા ।
રઙ્ગા રઙ્ગાઙ્ગમધુરા રોદસી ચ મહારવા ॥

રોધકૃદ્રોગહન્ત્રી ચ રૂપભૃદ્રોગસ્રાવિણી ।
બન્દી વન્દિસ્તુતા બન્ધુર્બન્ધૂકકુસુમાધરા ॥

વન્દિતા વન્ધમાના ચ વૈદ્રાવી વેદવિદ્વિધા ।
વિકોપા વિકપાલા ચ વિઙ્કુસ્થા વિઙ્કુવત્સલા ॥

વેદૈર્વિલગ્નલગ્ના ચ વિધિવિઙ્કુકરી વિધા ।
શઙ્ખિની શઙ્ખવલયા શઙ્ખમાલાવતી શમી ॥

શઙ્ખપાત્રા શિની શઙ્ખસ્વનશઙ્ખગલા શશી ।
શબરી શમ્બરી શમ્ભુઃ શમ્ભુકેશા શરાસિની ॥

શવા શ્યેનવતી શ્યામા શ્યામાઙ્ગી શ્યામલોચના ।
શ્મશાનસ્થા શ્મશાના ચ શ્મશાનસ્થાનભૂષણા ॥

શમદા શમહન્ત્રી ચ શઙ્ખિની શઙ્ખરોષરા ।
શાન્તિશ્શાન્તિપ્રદા શેષા શેષાખ્યા શેષશાયિની ॥

શેમુષી શોષિણી શેષા શૌર્યા શૌર્યશરા શરી ।
શાપદા શાપહા શાપાશાપપન્થા સદાશિવા ॥

શૃઙ્ગિણી શૃઙ્ગિપલભુક્ શઙ્કુરી શાઙ્કુરી શિવા ।
શવસ્થા શવભુક્ શાન્તા શવકર્ણા શવોદરી ॥

શાવિની શવશિંશાશ્રીઃ શવા ચ શમશાયિની ।
શવકુણ્ડલિની શૈવાશીકરા શિશિરાશિના ॥

શવકાઞ્ચી શવશ્રીકા શબમાલા શવાકૃતિઃ ।
સવન્તી સઙ્કુચા શક્તિશ્શન્તનુશ્શવદાયિની ॥

સિન્ધુસ્સરસ્વતી સિન્ધુસ્સુન્દરી સુન્દરાનના ।
સાધુઃ સિદ્ધિપ્રદાત્રી ચ સિદ્ધા સિદ્ધસરસ્વતી ॥

સન્તતિસ્સમ્પદા સંવચ્છઙ્કિસમ્પત્તિદાયિની ।
સપત્ની સરસા સારા સારસ્વતકરી સુધા ॥

સુરાસમાંસાશના ચ સમારાધ્યા સમસ્તદા ।
સમધીસ્સામદા સીમા સમ્મોહા સમદર્શના ॥

સામતિસ્સામધા સીમા સાવિત્રી સવિધા સતી ।

સવના સવનાસારા સવરા સાવરા સમી ॥

સિમરા સતતા સાધ્વી સધ્રીચી સસહાયિની ।
હંસી હંસગતિહંસી હંસોજ્જ્વલનિચોલયુક્ ॥

હલિની હાલિની હાલા હલશ્રીર્હરવલ્લભા ।
હલા હલવતી હ્યેષા હેલા હર્ષવિવર્દ્ધિની ॥

હન્તિર્હન્તા હયાહાહાહતાહન્તાતિકારિણી ।
હઙ્કારી હઙ્કૃતિર્હઙ્કા હીહીહાહાહિતાહિતા ॥

હીતિર્હેમપ્રદા હારારાવિણી હરિરસમ્મતા ।
હોરા હોત્રી હોલિકા ચ હોમા હોમહવિર્હવિઃ ॥

હરિણી હરિણીનેત્રા હિમાચલનિવાસિની ।
લમ્બોદરી લમ્બકર્ણા લમ્બિકા લમ્બવિગ્રહા ॥

લીલા લીલાવતી લોલા લલના લલિતા લતા ।
લલામલોચના લોભ્યા લોલાક્ષી સત્કુલાલયા ॥

લપત્ની લપતી લમ્પા લોપામુદ્રા લલન્તિકા ।
લતિકા લઙ્ઘિની લઙ્ઘા લાલિમા લઘુમધ્યમા ॥

લઘીયસી લઘૂદર્યા લૂતા લૂતાવિનાશિની ।
લોમશા લોમલમ્બી ચ લુલન્તી ચ લુલુમ્પતી ॥

લુલાયસ્થા બલહરી લઙ્કાપુરપુરન્દરા ।
લક્ષ્મીર્લ્લક્ષ્મીપ્રદા લભ્યા લાક્ષાક્ષી લુલિતપ્રભા ॥

ક્ષણા ક્ષણક્ષુક્ષુક્ષિણી ક્ષમાક્ષાન્તિઃ ક્ષમાવતી ।
ક્ષામા ક્ષામોદરી ક્ષેમ્યા ક્ષૌમભૃત્ક્ષત્રિયાઙ્ગણા ॥

ક્ષયા ક્ષાયાકરી ક્ષીરા ક્ષીરદા ક્ષીરસાગરા ।
ક્ષેમઙ્કરી ક્ષયકરી ક્ષયકૃત્ક્ષણદા ક્ષતિઃ ॥

ક્ષુદ્રિકા ક્ષુદ્રિકાક્ષુદ્રા ક્ષુત્ક્ષમા ક્ષીણપાતકા ।
માતુઃ સહસ્રનામેદં સુમુખ્યાસ્સિદ્ધિદાયકમ્ ॥

યઃ પઠેત્પ્રયતો નિત્યં સ એવ સ્યાન્મહેશ્વરઃ ।
અનાચારાત્પઠેન્નિત્યન્દરિદ્રો ધનવાન્ભવેત્ ॥

મૂકસ્સ્યાદ્વાક્પતિર્દેવિ રોગી નીરોગતાવ્વ્રજેત્ ।
પુત્રાર્થી પુત્રમાપ્નોતિ ત્રિષુ લોકેષુ વિશ્રુતમ્ ॥

વન્ધ્યાપિ સૂયતે પુત્રવ્વિદુષસ્સદૃશઙ્ગુરોઃ ।
સત્યઞ્ચ બહુધા ભૂયાદ્ગાવશ્ચ બહુદુગ્ધદાઃ ॥

રાજાનઃ પાદનમ્રાસ્સ્યુસ્તસ્ય હાસા ઇવ સ્ફુટાઃ ।
અરયસ્સઙ્ક્ષયય્યાન્તિ માનસા સંસ્મૃતા અપિ ॥

દર્શનાદેવ જાયન્તે નરા નાર્યોઽપિ તદ્વશાઃ ।
કર્ત્તા હર્ત્તા સ્વયવીરો જાયતે નાત્ર સંશયઃ ॥

યય્યઙ્કામયતે કામન્તન્તમાપ્નોતિ નિશ્ચિતમ્ ।
દુરિતન્ન ચ તસ્યાસ્તિ નાસ્તિ શોકઃ કથઞ્ચન ॥

ચતુષ્પથેઽર્દ્ધરાત્રે ચ યઃ પઠેત્સાધકોત્તમઃ ।
એકાકી નિર્બ્ભયો વીરો દશાવર્ત્તસ્તવોત્તમમ્ ॥

મનસા ચિન્તિતઙ્કાર્યં તસ્ય સિદ્ધિર્ન્ન સંશયઃ ।
વિના સહસ્રનામ્નાય્યો જપેન્મન્ત્રઙ્કદાચન ॥

ન સિદ્ધિર્જ્જાયતે તસ્ય મન્ત્રઙ્કલ્પશતૈરપિ ।
કુજવારે શ્મશાને વા મધ્યાહ્ને યો જપેત્સદા ॥

કૃતકૃત્યસ્સ જાયેત કર્ત્તા હર્ત્તા નૃણામિહ ।
રોગાર્ત્તોઽર્દ્ધનિશાયાય્યઃ પઠેદાસનસંસ્થિતઃ ॥

સદ્યો નીરોગતામેતિ યદિ સ્યાન્નિર્બ્ભયસ્તદા ।
અર્દ્ધરાત્રે શ્મશાને વા શનિવારે જપેન્મનુમ્ ।
અષ્ટોત્તરસહસ્રન્તુ દશવારઞ્જપેત્તતઃ ।
સહસ્રનામ ચૈતદ્ધિ તદા યાતિ સ્વયં શિવા ॥

મહાપવનરૂપેણ ઘોરગોમાયુનાદિની ।
તતો યદિ ન ભીતિઃ સ્યાત્તદા દેહીતિવાગ્ભવેત્ ॥

તદા પશુબલિન્દદ્યાત્સ્વયં ગૃહ્ણાતિ ચણ્ડિકા ।
યથેષ્ટઞ્ચ વરન્દત્ત્વા પ્રયાતિ સુમુખી શિવા ॥

રોચનાગુરુકસ્તૂરીકર્પ્પૂરૈશ્ચ સચન્દનૈઃ ।
કુઙ્કુમેન દિને શ્રેષ્ઠે લિખિત્વા ભૂર્જ્જપત્રકે ॥

શુભનક્ષત્રયોગે ચ કૃતમારુતસક્રિયઃ ।
કૃત્વા સમ્પાતનવિધિન્ધારયેદ્દક્ષિણે કરે ॥

સહસ્રનામ સ્વર્ણસ્થઙ્કણ્ઠે વા વિજિતેન્દ્રિયઃ ।
તદાયમ્પ્રણમેન્મન્ત્રી ક્રુદ્ધસ્સ મ્રિયતે નરઃ ॥

દુષ્ટશ્વાપદજન્તૂનાન્ન ભીઃ કુત્રાપિ જાયતે ।
બાલકાનામિયં રક્ષા ગર્ભિણીનામપિ પ્રિયે ॥

મોહનસ્તમ્ભનાકર્ષ-મારણોચ્ચાટનાનિ ચ ।
યન્ત્રધારણતો નૂનઞ્જાયન્તે સાધકસ્ય તુ ॥

નીલવસ્ત્રે વિલિખિતે ધ્વજાયાય્યદિ તિષ્ઠતિ ।
તદા નષ્ટા ભવત્યેવ પ્રચણ્ડાપ્યરિવાહિની ॥

એતજ્જપ્તમ્મહાભસ્મ લલાટે યદિ ધારયેત્ ।
તદ્વિલોકન એવ સ્યુઃ પ્રાણિનસ્તસ્ય કિઙ્કરાઃ ॥

રાજપત્ન્યોઽપિ વિવશાઃ કિમન્યાઃ પુરયોષિતઃ ।
એતજ્જપ્તમ્પિબેત્તોયમ્માસેન સ્યાન્મહાકવિઃ ॥

પણ્ડિતશ્ચ મહાવાદી જાયતે નાત્ર સંશયઃ ।
અયુતઞ્ચ પઠેત્સ્તોત્રમ્પુરશ્ચરણસિદ્ધયે ॥

દશાંશઙ્કમલૈર્હુત્વા ત્રિમધ્વાક્તૈર્વિધાનતઃ ।
સ્વયમાયાતિ કમલા વાણ્યા સહ તદાલયે ॥

મન્ત્રો નિઃકીલતામેતિ સુમુખી સુમુખી ભવેત્ ।
અનન્તઞ્ચ ભવેત્પુણ્યમપુણ્યઞ્ચ ક્ષયવ્વ્રજેત્ ॥

પુષ્કરાદિષુ તીર્થેષુ સ્નાનતો યત્ફલમ્ભવેત્ ।
તત્ફલલ્લભતે જન્તુઃ સુમુખ્યાઃ સ્તોત્રપાઠતઃ ॥

એતદુક્તં રહસ્યન્તે સ્વસર્વસ્વવ્વરાનને ।
ન પ્રકાશ્યન્ત્વયા દેવિ યદિ સિદ્ધિઞ્ચ વિન્દસિ ॥

પ્રકાશનાદસિદ્ધિસ્સ્યાત્કુપિતા સુમુખી ભવેત્ ।
નાતઃ પરતરો લોકે સિદ્ધિદઃ પ્રાણિનામિહ ॥

વન્દે શ્રીસુમુખીમ્પ્રસન્નવદનામ્પૂર્ણેન્દુબિમ્બાનનાં
સિન્દૂરાઙ્કિતમસ્તકામ્મધુમદોલ્લોલાઞ્ચ મુક્તાવલીમ્ ।

શ્યામાઙ્ગુઞ્જલિકાકરાઙ્ગુરગતઞ્ચાધ્યાપયન્તીં
શુકઙ્ગુઞ્જાપુઞ્જવિભૂષણાં સકરુણામામુક્તવેણીલતામ્ ॥

ઇતિ શ્રીનન્ધ્યાવર્ત્તતન્ત્રે ઉત્તરખણ્ડે માતઙ્ગીસહસ્રનામસ્તોત્રં
સમ્પૂર્ણમ્ ॥

The original text is
from Muktabodha Indological Research Institute
www.muktabodha.org
Data-entered by the staff of Muktabodha under the direction of Mark S. G.
Dyczkowski.
Reprint of edition published in 1892. Revision 0 february 9, 2009
Publisher : Shrivenkateshvara press Publication year : 1949

Reproofread by DPD

*Shri Matangi Sahasranamastotram*

pdf was typeset on August 28, 2021

Please send corrections to *sanskrit@cheerful.com*